दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

▪ पृष्ठ-4 ▪ वर्ष-3 ▪ अङ्क-126

1 27.02.2024 मंगलवासरः वि.सं. २०८० फाल्गुणकृष्णपक्षः तृतीया फाल्गुण १५ प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

हिमाचलराज्यचयना-योगेन आरम्भा रिक्तपदानां पूर्त्यर्थं प्रक्रिया, ३० मार्च दिनाङ्के भविष्यति परीक्षा 2



सुप्रसिद्ध-गज़लगायकस्य पंकजउधासस्य निधनम्। ७२ वयसि स्वीकृताः अन्तिमश्वासाः 3



उत्तरकाण्डम्! (षष्ठः सर्गः) रावणकुम्भकर्ण विभीषणानां तपस्या। 4



## प्रधानमन्त्रिणा स्वतंत्रता सेनान्यैः विनायकदामोदरसावरकराय पुण्यतिथौ श्रद्धांजलिः अर्पिता



प्रधानमन्त्रिणा नरेंद्रमोदिना 'वीर सावरकर' इति नाम्ना सुप्रसिद्धाय स्वतंत्रतासेनान्यैः विनायकदामोदरसावरकराय तस्य पुण्यतिथौ श्रद्धांजलिः अर्पिता। एकस्मिन् सामजिकान्तर्जालीय सन्देशे, श्रीमोदिना उक्तं यत्, भारतस्य स्वतंत्रतायाः अखंडतायाः च कृते वीरसावरकरस्य वीरता समर्पणं च सदैव स्मर्यते। प्रधानमन्त्रिणा उक्तं यत्, वीर सावरकरस्य योगदानं जनान् देशस्य विकासाय समृद्धये च प्रयासाय प्रेरयति।

## देशे निर्धनतायां पञ्चप्रतिशतं यावत् न्यूनतागता-नीत्यायोगः




नीतिआयोगस्य मुख्यकार्यकारी अधिकारिणा बी.वी. आर. सुब्रह्मण्यम् इत्यनेन उक्तं यत् नव-उपभोक्तृ-व्यय-सर्वेक्षणेन संकेतः प्राप्यते यत् देशे निर्धनतायां पञ्चप्रतिशतं यावत् न्यूनतागता। सर्वेक्षणानुसारं ग्रामीण-नगरीय क्षेत्रयोः जनाः सम्पन्नतां यान्ति। परह्यः नवदिल्ल्यां सम्वाद-दातृभिः सह चर्चायां श्री सुब्रह्मण्यम् इत्यनेन उक्तं यत् सर्वेक्षणेन नैकाः महत्वपूर्णाः विषयाः अग्रे समागताः सन्ति। गृहाणाम् उपभोग-सम्बद्धाङ्कैः देशे निर्धनतायाः स्थितिः दूरतां गता इति ज्ञायते। सर्वेक्षणानुसारं ग्रामीणनगरीय क्षेत्रयोः उपभोगे प्रायः द्विगुणात्मकं वृद्धिः अभवत्। नीत्यायोगस्य मुख्यकार्यकारी अधिकारिणा उक्तं यत् सर्वेक्षणस्य निष्कर्षानुसारं नगरीय- क्षेत्राणामपेक्षया ग्रामीण-क्षेत्रेषु उपभोगं तीव्रगत्यां सम्वर्धते।

## भारतीयरेलविभागस्य एकचत्वारिंशत्-सहस्रकोटितोप्यधिकानां रुप्यकाणाम् अवसंरचना-परियोजनानां शुभारम्भः



प्रधानमन्त्रिणा नरेन्द्रमोदिना दृश्य-श्रव्य परान्तर्जालीय माध्यमेन रेलवे इत्यस्य एकचत्वारिंशत्-सहस्रकोटितोप्यधिकानां रुप्यकाणाम् अवसंरचना-परियोजनानां शुभारम्भः विहितः। तेन रेल-विभागस्य द्विसहस्रतोप्यधिकानां परियोजनानाम् आधारशिला स्थपिता राष्ट्राय च काश्चन योजनाः समर्पिताः। कार्यक्रमावधौ श्रीमादिना "अमृत भारत-स्थानक- योजनान्तर्गतं" त्रिपञ्चाशदुत्तर-पञ्चशतं यावत् रेल-स्थानकानां पुनर्विकास-कार्यक्रमस्य आधारशिलापि संस्थापिता। अष्टाविंशतिः राज्येषु अष्टकेन्द्रशासितप्रदेशेषु स्थितानां एतेषां रेलस्थानकानां पुनर्विकास-कार्यम् ऊनविंशतिः सहस्रकोटितोप्यधिकानां रुप्यकाणां व्ययेन क्रियते। प्रधानमन्त्रिणा उत्तरप्रदेशे गोमतीनगर-रेलस्थानकस्यापि उद्घाटनं विहितम्। श्रीमोदिना सार्धक-सहस्र यावत् उन्नतमार्गाणां भूमिगतमार्गाणाञ्चापि शुभारम्भः विहितः।
अस्मिन् अवसरे प्रवदत्ता रेलमन्त्रिणा अश्विनी वैष्णवेण उक्तं यत् विगतेषु दशवर्षेषु रेल- विभागेन परिवर्तनेन सममेव विकासस्य कालोऽपि दृष्टः। तेन ख्यापितं यत् एकत्रिंशत्-सहस्र किलोमीटरपरिमितं यावत् रेल मार्गाणां प्रसारणमभवत् अपि च चत्वारिंशत् सहस्र-किलोमीटर- परिमितं यावत् रेलमार्गाणां विद्युतीय-करणं एतेषु वर्षेषु जातम्। तेनोक्तं यत् अद्य प्रतिदिनं प्रायः पञ्चदश किलोमीटर रेलमार्गाणां प्रसारणं क्रियते तत्रैव चतुर्दशोत्तर द्विसहस्र तमे वर्षे केवलं चत्वारि किलोमीटर परिमितं यावदेव रेलमार्गाणां प्रसारणम् आसीत्। तेन इदमपि ख्यापितं यत् वर्तमान सर्वकारस्य कार्यावधौ जम्मू-कश्मीर पूर्वोत्तर राज्येषु च रेल-क्षेत्रे अभूतपूर्व कार्याणां सम्पादनं जातम्।

## चिकित्साविज्ञानं न केवलं चिकित्सायाम् एव सीमितं वर्तते अपितु अतीव विस्तृतम् अभवत्- राष्ट्रपतिः द्रौपदीमुर्मू



राष्ट्रपतिना द्रौपदी मुर्मू इत्यनया प्रोक्तं यत् अद्यत्वे चिकित्साविज्ञानं न केवलं चिकित्सायाम् एव सीमितं वर्तते अपितु अतीव विस्तृतम् अभवत्। सा उक्तवती यत् चतुर्थ औद्योगिकक्रान्ति-कारणात् भौतिक-अङ्कीय-जैविकक्षेत्रयोः मध्ये अन्तरं न्यूनं जातम्। नवदिल्ल्यां लेडी हार्डिङ्ग चिकित्सा महाविद्यालयस्य वार्षिकोत्सवं दीक्षांत समारोहं च सम्बोधयता सा इत्थम् उक्तवती। सा अवदत् यत् कृत्रिमजीवविज्ञाने क्रियमाणाः नवाचाराः नव-अभियान्त्रिक-विकासाः च शताब्दशः जनित-समस्यानां समाधानं प्राप्तुं सहायकाः आसन्।

## भारतीय-नागरिकाः ये च रुस-सेनया निगडिताः सन्ति तान् अतिशीघ्रं मोचयेत्- विदेशमन्त्रालयः



भारतीय-विदेश-मन्त्रालयेन प्रोक्तम् अस्ति यत् मन्त्रालयेन रूस- सेनायाः अधिकारिणः निवेदिताः सन्ति यत् ते भारतीय- नागरिकाः ये च रुस-सेनया निगडिताः सन्ति तान् अतिशीघ्रं मोचयेत् , अपि च भारतीय-नागरिकानां मुक्ति-विषये भारतीय विदेश मन्त्रालयस्य सर्वोच्च प्राथमिकता अपि वर्तते। मन्त्रालयेन इदम् अपि कथितं यत् तेन संचार-तन्त्र-माध्यमेन इदमपि श्रुतं दृष्टं वर्तते यत् भारतीयाः जनाः रुस- सेनातः मुक्त्यर्थं साहाय्यं याचमानाः सन्ति एतस्मिन् सन्दर्भे च काश्चन दुःसूचनाः अपि श्रुताः सन्ति। मन्त्रालयेन निगदितं यत् भारतीय दूतावासस्य संज्ञाने एतादृशानि यानि प्रकरणानि आनीतानि सन्ति तानि रूस-देशस्य अधिकारिणां समक्षे दृढतया उत्थापितानि सन्ति। परिमाणतः केचन भारतीयाः पूर्वमेव रूससेनया मोचिताः सन्ति।

## विकसितभारतस्य निर्माणे वस्त्रोद्योगस्य योगदानं वर्धितं स्याद्- प्रधानमन्त्री

प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तं यत् विकसितभारतस्य निर्माणे वस्त्रोद्योगस्य योगदानं वर्धितं स्यादिति तस्यां दिशि सर्वकारः कार्यं कुरुते। अवधेयं यत् श्रीमोदी नवदेहल्यां स्थिते भारतमण्डपे भारत-वस्त्रम् इत्यस्य कार्यक्रमस्य उद्घाटने सत्रे इमान् विचारान् प्रकटितवान्। सामान्यवस्त्राणि अतिरिच्य खादी-वस्त्रोद्योग-क्षेत्रेण अपि महिलाशक्तिः संवर्धिता अस्ति। चतुर्दिवसीयं वस्त्र-कार्यक्रमः सम्प्रति यावत् भारते वस्त्रविषयकेषु आयोजितेषु कार्यक्रमेषु बृहत्तमः वर्तते, यस्मिन् चकार्यक्रमे शताधिकदेशेभ्यः समागताः वस्त्रोद्योगिनः भागं गृह्णन्ति।

## प्रमुखाः वार्ताः

## ज्ञानवाप्यां व्यासस्य प्रकोष्ठपरिसरे पूजा अनवरतरूपेण चलिष्यति- न्यायालयः



इलाहाबाद उच्चन्यायालयेन ज्ञानवापी मस्जिद-समित्याः आवेदनम् अस्वीकृतम्, यस्मिन् उत्तरप्रदेशस्य वाराणस्यां ज्ञानवापी परिसरे व्यास जी का तहखाना इत्यत्र हिन्दूपक्षीयानां प्रार्थनां कर्तुं अनुमतेः आदेशं विरूध्यावेदनम् आसीत्। न्यायमूर्ति-रोहित-रंजन-अग्रवालस्य पीठेन निर्णयमिदं श्रावितम्, अपि च ज्ञानवापी-परिसराभ्यन्तरे पूजार्चनायाः वाराणसी-न्यायालयस्य- आदेशं यथावदेव स्थापितम्। उच्चन्यायालयेन इदमपि प्रोक्तं यत् त्रिनवत्यधिक ऊनविंशति शततमे वर्षे "व्यास जी का तहखाना" इत्यस्याभ्यन्तरे पूजार्चनामवरोधुं राज्यसर्वकारस्य कार्याचरणं असम्वैधानिकम् आसीत्। ज्ञानवापी-मस्जिद-प्रबन्धन-अंजुमन इन्तजामिया मस्जिद- समित्या अस्यमासस्य प्रथमे दिनांके उच्च न्यायालयस्य समक्षम् आवेदनं कृतमासीत। इतः पाक् सर्वोच्चन्यायालयेन व्यास जी का तहखानायां पूजायाः आदेशस्य विरुद्धं मस्जिद समित्या याचिकायां तत्क्षणं कार्याचरणेन निराकृतम्।

## सुभाषितम्

**शान्तितुल्यं तपो नास्ति**
**न संतोषात्परं सुखम् ।**
**अपत्यं च कलत्रं च**
**सतां संगतिरेव च ।।**

भावार्थ- शांति के तुल्य कोई तप नहीं है, और संतोष से बढ़कर कोई सुख नही है। अच्छे पुत्र और पत्नी का साथ, और सत्पुरुषों की सभा ही सच्चा संगति है।।

*प्रतीकसाठ्ये मुम्बई*

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## राज्यसभानिर्वाचनम् : काँग्रेसस्य सचेतकस्य विरुद्धं निर्वाचनायोगं प्रति गतं भाजपादलम्



हिमसंस्कृतवार्ता- शिमला। राज्यसभानिर्वाचने मतदानात् केवलं एकदिनपूर्वं भारतीयजनतादलेन काङ्ग्रेसेन निर्गतस्य सचेतकस्य विषये निर्वाचन-आयोगाय लिखितोपालम्भः दत्तः। एषः उपालम्भः भाजपादलस्य प्रदेशाध्यक्षः डॉ. राजीवबिन्दलः, मुख्यप्रवक्ता रणधीरशर्मा एवं पार्टी प्रत्याशी हर्षमहाजनद्वारा पृथक्-पृथक् रूपेण प्रदत्तम्। भाजपा कथयति यत् राज्यसभानिर्वाचने मुक्तमतपत्रव्यवस्था अस्ति, अभ्यर्थिनः नाम्ना सचेतना (व्हिप) निस्सारणं निर्वाचनं प्रभावितं कर्तुं प्रयत्नः एव।उपालम्भेन सह काङ्ग्रेसविधानपक्षस्य मुख्यसचेतकेन हर्षवर्धनचौहानेन निर्गतस्य त्रिपङ्क्तिसचेतकस्य प्रतिलिपिः अपि संलग्ना अस्ति। एषः सचेतकः काङ्ग्रेसपक्षेण त्रिदिवसपूर्वं निर्गतम्, यस्मिन् न केवलं विधायकाः २७ फरवरी दिनाङ्के मतदानार्थं उपलब्धाः भवेयुः इति आहूताः, अपितु काङ्ग्रेसपक्षस्य अधिकृतस्य प्रत्याशी अभिषेकमनुसिंघवी इत्यस्य नाम अपि लिखितम् आसीत्। राज्यसभानिर्वाचने जगतसिंहनेगी, संजयः अवस्थी च अधिकृत अभिकर्तारूपेण नामाङ्कितौ, भाजपादलेन सतपालसती, राकेशजम्वालः च नामाङ्कितौ।निर्वाचने काङ्ग्रेस-भाजपायाः प्रत्येकं विधायकं स्वस्य अधिकृत-अभिकर्तुः प्रकटीकरणं कृत्वा मतदानं कर्तव्यं भविष्यति। यदि मतदानात् पूर्वं न दर्शितं तर्हि अधिकृतः अभिकर्ता तत् अमान्यं कर्तुं शक्नोति। परन्तु यदि कस्यचित् दलस्य कोऽपि विधायकः स्वस्य क्रॉस् वोट् प्रकटयति तर्हि सः अमान्यः न भविष्यति। न च अस्मिन् निर्वाचने प्रदत्तमतानाम् आधारेण विधायकस्य अयोग्यता न भवितुमर्हति।

## हिमाचलस्य चतुर्णां उड्डविमानस्थलानां निर्माणाय उडान्योजनायां ५२ कोटिरूप्यकाणां बजटं अनुमोदितम्



हिमसंस्कृतवार्ता- कार्यालयीयः प्रतिनिधिः।भारतसर्वकारस्य उड़ान- ५.१ क्षेत्रीयसंपर्कयोजनायाः (RCS) अन्तर्गतं हिमाचलप्रदेशस्य चतुर्षु विधानसभाक्षेत्रेषु उड्डविमानस्थलानां निर्माणं भविष्यति। एतदर्थं योजनायाः अन्तर्गतं केन्द्रसर्वकाराद् ५२ कोटिरूप्यकाणां बजटं मुक्तं कृतम् अस्ति। प्रत्येकस्य उड्डविमानस्थलस्य निर्माणकार्ये १३ कोटिरूप्यकाणि व्यितानि भविष्यन्ति। एतदर्थं काङ्गड़ाजनपदस्य अन्तर्गतं रक्कड़-पालमपुरयोः किन्नौर-विधानसभाक्षेत्रस्य रिकोंगपियो तथा चम्बायां च स्थलानां चयनं कृतमस्ति। भारतीयविमानस्थानकप्राधिकरणस्य आरसीएस प्रबन्धकः अतुल्य अग्रवालः अस्मिन् विषये हिमाचलप्रदेशस्य पर्यटन-नागरिक-विमाननविभागस्य प्रमुखसचिवं प्रति बजट-अनुमोदनस्य विषये पत्रं प्रेषितवान् अस्ति। २०२३ तमस्य वर्षस्य अक्टोबर्-मासस्य २६ दिनाङ्के राज्यसर्वकारेण भारतसर्वकारस्य नागरिकविमानयानमन्त्रालयस्य संयुक्तसचिवं प्रति एतेषां उड्डविमानस्थलानां निर्माणार्थं बजटसम्बद्धं पत्रं प्रेषितम्। परियोजनामूल्यांकनसमित्या २०२४ तमस्य वर्षस्य जनवरीमासे १५ दिनाङ्के आयोजिते सत्रे एतेषां चतुर्णां हेलीपोर्ट्-स्थानकानां बजटस्य अनुमोदनं कृतम् आसीत्।अधुना भारतस्य विमानस्थानकप्राधिकरणेन एतेषां चतुर्णां उड्डविमानस्थलानां निर्माणार्थं बजटं विमोचयन् हिमाचलसर्वकाराय निर्देशः दत्तः यत् सः उड्डविमानस्थलानां निर्माणेन संचालनेन च सम्बद्धं कार्यं शीघ्रमेव सम्पन्नं करोतु। तदनन्तरं उपयोगिताप्रमाणपत्रं प्राधिकरणाय प्रस्तोतव्यम्। भारतसर्वकारस्य उड़ान-५.१ क्षेत्रीयसंपर्कयोजनायाः (RCS) अन्तर्गतं हेलीपोर्ट्-निर्माणं क्रियते। नागरिकविमानमन्त्रालयस्य यूडीएएन योजनायां विभीषिकायां चिकित्सावस्तूनां वितरणं, आदिवासीजनपदेषु कृषिजन्यपदार्थानाम् आपूर्तिः, विमानयात्रा इत्यादयः सन्ति।धर्मशालायाः विधायकः सुधीरशर्मा अवदत् यत् क्षेत्रीयसंपर्कयोजनायाः (RCS) UDAN-5.1 इत्यस्य अन्तर्गतं हेलीपोर्टस्य बजटस्य अनुमोदनं प्राप्तम् अस्ति। धर्मशालायां पालमपुरे च हेलीपोर्ट्-स्थानानि निर्मिताः भविष्यन्ति। एतस्मात् पर्यटनव्यापारस्य लाभः भविष्यति।

## हिमाचलराज्यचयनायोगेन आरम्भा रिक्तपदानां पूर्त्यर्थं प्रक्रिया, ३० मार्च दिनाङ्के भविष्यति परीक्षा




हिमाचलप्रदेशे राज्यचयनायोगस्य परीक्षासु कथितभ्रष्टाचारस्य आरोपानन्तरं चयनायोगः स्थगितः अभवत्। तदनन्तरं ३० सितम्बर २०२३ दिनांके हिमाचलप्रदेशराज्यचयनआयोगस्य (एचपीआरसीए) माध्यमेन प्रथमा भर्तीप्रक्रिया आरब्धा अस्ति ३० मार्च दिनाङ्के ऑपरेशन थिएटर असिस्टेन्ट् (ओटीए) डाक कोड १०७३ इत्यस्य १६२ पदानाम् लिखितपरीक्षा भविष्यति।

## शैक्षणिकसंस्थानेभ्यः वार्षिकक्रमाङ्कनस्य आधारेण प्रदास्यते अनुदानम् -मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः



हिमसंस्कृतवार्ता- शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः शिमला ग्रामीणविधानसभानिर्वाचनक्षेत्रे १५.४३ कोटिरूप्यकाणां व्ययेन निर्मितस्य जवाहरलालनेहरुललितकला-राजकीय महाविद्यालयस्य लौहारबस्य भवनस्य उद्घाटनं कृतवान्। तेन टुट्टूनगरे ५ कोटिरूप्यकाणां व्ययेन निर्मितस्य खण्डविकासकार्यालयभवनस्य शिलान्यासः अपि कृतः। अस्मिन् अवसरे आयोजितां जनसभां सम्बोधयता मुख्यमन्त्री ललितकलामहाविद्यालये नूतनान् पाठ्यक्रमान् आरभ्य आधुनिककक्ष्याः विकसितुं, क्रीडाक्षेत्राय २० लक्षरूप्यकाणि प्रदातुं च घोषणां कृतवान्। अस्य क्षेत्रस्य कृते बससेवा आरब्धा भविष्यति तथा च महाविद्यालये छात्रावासस्य सुविधां प्रदातुं प्रयत्नाः अपि क्रियन्ते। मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारः शिक्षाक्षेत्रे व्यापकोन्नयनं कुर्वन् अस्ति तथा च गुणात्मकशिक्षायाः विशेषप्राथमिकता दीयते।सः अवदत् यत् २०२४-२५ वित्तवर्षे सर्वेषां शैक्षणिकसंस्थानां वार्षिकक्रमाङ्कनं तेषां कृते कार्यप्रदर्शनाधारित-अनुदानव्यवस्थायाः आरम्भस्य च प्रावधानं कृतम् अस्ति। एषा व्यवस्था युगपद्-पटलस्य (ऑनलाइन पोर्टल) मार्गेण विकसिता भविष्यति। सः अवदत् यत् पठन-लेखन-संस्कृतेः विकासाय बहु-आयामी प्रावधानाः कृताः सन्ति। ललितकला महाविद्यालयस्य आधारः पूर्वमुख्यमन्त्री वीरभद्रसिंहेन स्थापितः। सम्प्रति १७ राज्येभ्यः छात्राः अस्मिन् संस्थायां अध्ययनं कुर्वन्ति। संस्थायां उच्चगुणवत्तायुक्तशिक्षायाः सुनिश्चित्य छात्राणां कृते सर्वसम्भवाः सुविधाः प्रदत्ताः भविष्यन्ति। आदर्शविधानसभाक्षेत्रं भविष्यति शिमला ग्रामीणम्-विक्रमादित्यसिंहः:लोकनिर्माणमन्त्री विक्रमादित्यसिंहः अवदत् यत् शिमला ग्रामीणविधानसभाक्षेत्रं विकासस्य दृष्ट्या आदर्शक्षेत्ररूपेण उद्भवति, विकासकार्याय च निरन्तरगतिः दीयते। सः अवदत् यत् अस्मिन् विधानसभाक्षेत्रे एकवर्षे १७० कोटिरूप्यकाणां विकासकार्यं प्रचलति। क्षेत्रस्य विविधाः विकासात्मकाः प्रार्थनाः अपि मुख्यमन्त्रिणः समक्षं प्रस्तुतवान्।

## हिमाचलस्य ५९ नगरानां कृते नूतना विकास-योजना भविष्यति सर्वकारेण कृतः निर्णयः



हिमसंस्कृतवार्ताः - शिमला। हिमाचलप्रदेशस्य ५९ नगरानां कृते नूतना विकासयोजना निर्मिता भविष्यति। भवनस्य निर्माणार्थं संरचनायाः परिकल्पना, अभियन्तुः प्रतिवेदनं च आवश्यकं भविष्यति। राज्ये प्राकृतिकविपदात् पाठं गृहीत्वा सर्वकारः अस्य विषये योजनां सज्जीकरोति। शिमलाविकासयोजनायाः पञ्च नगरीयनिकायानां भवननिर्माणार्थं एषा योजना भविष्यति। अस्मिन् विषये सभायां अपि विस्तृतविमर्शः अभवत्। प्राकृतिकविपत्सु गृहाणां पतनस्य क्षतेः च पृष्ठतः मुख्यकारणं संरचनायाः परिकल्पना, अभियंतृभिः सह परामर्शस्य अभावः च इति कथ्यते एतादृशे सति योजनायाः अन्तर्गतं नगरीयनिकायेषु भवननिर्माणं कर्तुं सर्वकारः विचारयति।शिमला योजनाक्षेत्रं सर्वोच्चन्यायालयेन अनुमोदितं जातम्। अस्य अन्तर्गतं शिमला योजनाक्षेत्रे त्रितः पञ्चभूमिकानि भवनानि निर्मातुं अनुमतिः दत्ता अस्ति। यत्र पञ्चमीटर् मार्गः अस्ति तत्र जनाः पञ्चतलपर्यन्तं भवनानि निर्मातुं शक्नुवन्ति, यत्र मार्गः नास्ति तत्र द्विस्तरीयभवनानि, अटारीः च निर्मातुं शक्यन्ते अटारी अपि सर्वकारेण आवासीयं कृतम् अस्ति। अस्य ऊर्ध्वता १० पादपरिमितम् अस्ति। अस्य विषये जनाः त्रितलं प्राप्नुवन्ति इति अर्थः। अन्येषां नगरीयसंस्थानां कृते अपि राज्यसर्वकारः एतादृशी योजनां निर्मातुं विचारयति। अस्मिन् राज्ये ५९ नगरसंस्थाः सन्ति। नगरनियोजन-मन्त्री राजेशधर्माणी उक्तवान् यत् राज्ये योजनायुक्तानां भवनानां निर्माणस्य आवश्यकता वर्तते।प्राकृतिकविपदायाः कारणेन राज्ये त्रिसहस्रगृहाणि क्षतिग्रस्तानिराज्ये प्राकृतिकविपदायाः कारणेन प्रायः त्रिसहस्राणि गृहाणि क्षतिग्रस्तानि सन्ति। अधिकतमा हानिः मण्डीजनपदे एव अभवत्। वर्षाकारणात् नालिकासु वर्धमानः जलस्य प्रवाहः , अनेकानि गृहाणि च स्वयमेव अप्रक्षालयत्।

# सिरमौरजनपदस्य जिलाप्रशिक्षणसंस्थाने प्रारम्भिकस्तरीय-सेवारतानां संस्कृतशिक्षकाणां नाहने प्रशिक्षणकार्यशालायाः शुभारम्भः




(हिमसंस्कृतवार्ता-प्रवीण कुमारः, सिरमौरः) प्रदेशे शिक्षाक्षेत्रे गुणवत्ताम् आनेतुं सर्वकारेण नैकाः प्रयासाः क्रियन्ते। विविधजनपदेषु शिक्षकाणां प्रशिक्षणकार्यशालानाञ्च आयोजनम् क्रियते। तत्रैव सिरमौरजनपदस्य जिलाप्रशिक्षणसंस्थाने नाहनम्–इत्यत्र संस्कृतशिक्षकाणां प्रशिक्षणकार्यशालायाः आयोजनम् अभवत् । अस्मिन् अवसरे कार्यशालायाः संयोजकः सन्तरामशर्मा महोदयः शिक्षकान् सम्बोधयन् उक्तं यत् विश्वस्य प्राचीनतमा भाषा संस्कृतं वर्त्तते । अतः अस्माकं सौभाग्यं वर्त्तते यत् संस्कृतशिक्षकाः अत्र प्रशिक्षणं प्राप्स्यन्ति ।एतदतिरिक्तं सः उक्तवान् यत् अस्याः कार्यशालायाः आयोजनम् 26 फरवरीतः 1 मार्च पर्यन्तम् भविष्यति । कार्यशालायामस्यां सिरमौरजनपदस्य पञ्चाशताधिकसंस्कृतशिक्षकाः प्रशिक्षणं प्राप्स्यन्ति। पञ्चदिवसीयकार्यशालायां शिक्षकैः शिक्षणाधिगमस्य प्रविधिनां विषये, भाषाकौशलानां विषये, भाषिकतत्त्वानां विषये, मूल्याङ्कनस्य विषये, नवशिक्षानीतिः २०२० इत्यस्याः विषये, भाषाशिक्षणस्य साधनानां विषये च प्रशिक्षणं प्राप्स्यन्ति । कार्यशालायां आचार्यराधेश्यामः , प्रवीणः शर्मा , चंबेलः, अर्चना च स्रोतव्यक्तिरूपेण समुपस्थिताः भविष्यन्ति। ध्यातव्यं वर्तते यत् कार्यशालायांमस्यां शिक्षणप्रशिक्षणकार्यं संस्कृतमाध्यमेन एव भविष्यति ।




# शेयरविपणौ तीक्ष्णविक्रयणं कृत्वा सेन्सेक्सः ३५० अंकैः न्यूनः अभवत्, निफ्ट्यपि अधः आगतः

(हिमसंस्कृतवार्ताः - दिलीपः (नादौनम्) सोमवासरे शेयरविपणौ बहुविक्रयणं जातम्। लाभबुकिंग् इत्यस्य कारणेन विपणः इत्यस्य प्रमुखाः सूचकाङ्काः रक्तवर्णे एव निमीलिताः अभवन् । सेन्सेक्सः ३५२ अंकैः पतित्वा ७२,७९० अंकस्तरम् यावत् अभवत् । निफ्टी अपि ९० अंकाः स्खलितः भूत्वा २२,१२२ अंकस्तरं यावत् आगतः । सूचनाप्रौद्योगिकीक्षेत्रेषु, बैंकक्षेत्रेषु च विक्रयणं विपण्यां दबावं जनितः । ततः पूर्वं शुक्रवासरे सेन्सेक्सः १५ अंकैः पतित्वा ७३,१४२ अंकैः समाप्तः आसीत् । ,

## सुवर्ण-रजतौ


आन्तरिक वायदाविपणौ सुवर्णरजतयोः न्यूनयोः जातौ । एम०सी०एक्स० इत्यत्र सुवर्णस्य दरं प्रायः ११५ रुप्यकैः सह न्यूनतां आगच्छत्, प्रति १० ग्रामं ६२२३० रुप्यकाणां मूल्ये च व्यापारः अभवत् । रजतस्य मूल्यमपि तीव्ररूपेण अपतत्। एम०सी०एक्स० इत्यत्र रजतस्य दरः ३३० रुप्यकैः न्यूनमागतऽस्ति, यः प्रतिकिलो ७०१५० रुप्यकेषु व्यापारः कुर्वन्नासीत् ।

# सुप्रसिद्ध–गज़लगायकस्य पंकजउधासस्य निधनम्। ७२ वयसि स्वीकृताः अन्तिमश्वासाः



(हिमसंस्कृतवार्ता शिवा शर्मा)विगतदिने सुप्रसिद्ध–गज़लगायकस्य पंकजउधासस्य निधनम् जातम् । असौ ७२ वयसि अन्तिमश्वासान् स्वीकृतवान्। तस्य जन्म १९५१ तमे वर्षे मई मासस्य १७ दिनाङ्के गुजरातराज्यस्य जेटपुरनगरे अभवत् । पंकजउधासस्य पुत्री नायाबउधासः स्वकीये इंस्टाग्रामपटले विलिख्य स्वपितुः निधनस्य पुष्टिं कृतवती। अनया लिखितं यत् " सखेदं संसूच्यते यत् पद्मश्रीपङ्कजउधासस्य दीर्घकालीनरोगेण 26 फरवरी 2024 दिनाङ्के दैवलोकप्रस्थानमभवत्।"प्राप्तवार्तानुसारं पङ्कज–उधासस्य निधनं २६ फरवरीदिनाङ्के प्रातः ११ वादने ब्रीचकैण्डीचिकित्सालये अभवत् । गायकः चिरकालाद् रुग्णः आसीत् । विगतदिवसेभ्यः तस्य स्वास्थ्यं समीचीनं नासीत् । गायकस्य निधनस्य वार्तया चलच्चित्रजगति सर्वत्र शोकतरङ्गाः वर्तन्ते। तस्य प्रशंसकाः स्तब्धाः सन्ति । प्रशंसकाः सामाजिकसंचारमाध्यमेषु तस्य स्मरणं संकृत्य तस्मै श्रद्धाञ्जलिम् यच्छन्ति।

# दुग्धविकासाय नाबार्डतः २५० कोटिरूप्यकाणां ऋणं ग्रहीष्यति हिमाचलप्रदेशसर्वकारः





हिमसंस्कृतवार्ता- शिमला। पशुपालकानां आयं वर्धयितुं दुग्धविकासयोजनायाः अन्तर्गतं दुग्धविकासाय नाबार्डसंस्था हिमाचलसर्वकाराय ऋणं दास्यति। नाबार्ड् इत्यनेन सर्वकारस्य प्रस्तावः अनुमोदितः अस्ति, आगामिसप्ताहे सर्वकारस्य नाबार्ड-इत्यस्य च मध्ये एतस्य विषये अभिसन्धिः क्रियते। चतुर्प्रतिशतव्याजेन नाबार्डतः प्रायः २५० कोटिरूप्यकाणां ऋणं ग्रहीतुं योजना अस्ति। एषा सूचना कृषिपशुपालनमन्त्री प्रो. चन्द्रकुमारः सोमवासरे दत्तवान्। सः अवदत् यत् दुग्धविकासाय जायका (Japan International Corporation Agency) इत्यस्मात् बजटं सर्वकारेण याचितं, यत् स्वीकृतं नाभवत्। दुग्धनिर्मातृणां आयं वर्धयितुं काङ्गड़ामण्डलस्य ढगवारे प्रतिदिनं १.५० लक्षसेटकरक्षमतया स्वचालितदुग्धप्रक्रियासंयंत्रं स्थापयितुं सर्वकारः गच्छति। निर्माणकार्यस्य निविदाव्ययः सर्वकारः स्वस्तरेन वहति।सः अवदत् यत् राष्ट्रीयदुग्धविकासमण्डलेन परियोजनायाः परामर्शसेवाः प्रदत्ताः भविष्यन्ति। नाबार्ड् इत्यस्य ऋणेन संयंत्रस्य निर्माणं भविष्यति। ग्रामीणक्षेत्रेषु कृषकाणां दुग्धक्रयणतन्त्रम् अपि सुदृढं कर्तव्यम् अस्ति। ढगवार-संयंत्रस्य कृते प्रतिदिनं २.७४ लक्ष-लीटर-दुग्धस्य क्रयणं भविष्यति । जाइका-अन्तर्गतं दुग्धविकासाय देशस्य अनेकराज्येभ्यः बजटं उपलब्धं कृतम् अस्ति । परन्तु हिमाचलस्य प्रस्तावः स्वीकृतः नास्ति। तर्कः कृतः यत् जाइका-अन्तर्गतं हिमाचलस्य कृते पूर्वमेव अनुमोदितानां परियोजनानां कृते धनं दत्तम् अस्ति, अधुना नूतनाः परियोजनाः समाविष्टाः कर्तुं न शक्यन्ते। सः अवदत् यत् नाबार्ड् इत्यनेन दुग्धविकासाय ऋणं दातुं सहमतिः कृता अस्ति। चतुर्प्रतिशतव्याजेन प्रायः २५० कोटिरूप्यकाणां ऋणं ग्रहीतुं योजना अस्ति। अस्य विषये शीघ्रमेव नाबार्ड् इत्यनेन सह अभिसन्धिः भविष्यति। ढगवारस्वचालितदुग्धप्रक्रियासंयंत्रस्य निविदायाः व्ययः सर्वकारः तस्य कोषात् वहति इति मुख्यमन्त्री अनुमोदितवान्।

# प्रवर्तननिदेशालस्य न्यायालयस्य सप्तम्याः संचेतनानन्तरमपि

### देहल्याः मुख्यमन्त्री केजरीवालः नोपस्थितः




प्रवर्तन निदेशालयेन देहल्याः मुख्यमन्त्रिणे अरविन्द केजरीवालाय उत्पाद शुल्क-नीति-भ्रष्टाचार- प्रकरणे सप्तमी-संचेतना प्रदत्ता आसीत् परन्तु पुनरपि सा तत्र न अगच्छत्। आम आदमी पार्टी- इति दलेन कथितं यत् इदं प्रकरणं न्यायालयाधीनो वर्तते अतः प्रवर्तननिदेशालयोपि न्यायालयीयस्य निर्णयस्य प्रतीक्षां कुर्यात्। आपदेलन इदमपि कथितं यत् केन्द्रसर्वकारः सबलम् आपदलम् अभिभवितुम् इच्छति अतः एव केजरीवालं विरुध्य एतादृशानि प्रकरणानि संयोजितानि सन्ति।

# तापदुःखम्

विषयाणाम् अपूर्णतायां चित्ते उत्पन्नं परितापं तापदुःखम् भवति। विषयाणां प्रतीतिकाले विरोधिपदार्थेषु द्वेषे सति कायिक-वाचिक-मानसिक-चेष्टाभिः अपरेभ्यः दुःखं भवति यथा- अद्य अस्य शत्रोः नाशः श्वः अन्येषां नाशं करिष्यामि इत्यस्याः भावनायाः विकासः भवति। एतादृशयः चित्तवृत्तयः भाविदुःखस्य कारकाः भवन्ति, अतएव श्रीमद्भगवद्गीतायां विषयचिन्तनमपि सर्वनाशस्य कारणमिति स्वीक्रियते



## संस्कारदुःखम्-

पुनर्जन्मनि सति सुखाद्यनुभवैः संस्काराः, संस्कारैश्च स्मरणम्, स्मरणात् रागाद्युत्पन्ने सति सुखानुभवजनितैः संस्कारैः प्रत्येकजन्मनि कर्माणां समूहः भवति, अयमेव विषयसुःखे संस्कारदुःखम् भवति। यथा विषये परिणाम-ताप-संस्कारदुःखः भवति, तद्वदेव गुणवृत्तीनां परस्परविरुद्धे विषयसुखम् दुःखरूपात्मकं संभवति। चञ्चलाः गुणाः क्षणे-क्षणे विलक्षणान् परिणामान् प्राप्नुवन्ति, अतः क्षणिकदुःखम् अन्ते दुःखरुपात्मकं भवति। श्रीमद्भगवद्गीतायामुक्तम्- हे अर्जुन! इन्द्रिय-विषयोर्संयोगात् उत्पन्नाः भोगाः दुःखहेतवः आद्यन्तवन्ताः भवन्ति । निष्कर्षोऽयं प्राप्यते यत् दुःखरुपात्मके विषयोपभोगे सुखप्रतीतिः अविद्येति।

## अनात्मनि आत्मतत्वप्रतीतिः-

पशु-पुत्र-स्त्री-भृत्यादयः अचेतनाः शय्या-आसन-गृहादयः चेतनाः सर्वे आत्मनः भिन्नाः वर्तन्ते, एतेषु मदीयं मह्यम् अहम् मम इत्यादिनां भावः मिथ्याज्ञानं वर्तते। नारदपुराणानुसारं गृहम् क्षेत्रम् च सर्वं शरीपोपभोगाय भवति। विवेकी मनुष्यः शरीरात् पृथक् आत्मनं स्वीकरोति, अतः निज-पुत्रादिषु अधिका आसक्तिः दुःखस्य कारणं भवति । मिथ्याज्ञानमेव अविद्यायाः कारणम्, अतः अविद्यायाः नाशे सति मिथ्या ज्ञानस्य नाशः स्वयमेव भवति।

दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
4
27.02.2024 मंगलवासरः वि.सं. २०८० फाल्गुणकृष्णपक्षः तृतीया फाल्गुण १५ प्रविष्टांशः
Website- www.himsanskritam.com Email-himsanskrit@gmail.com



## ।। श्रीरामायणकथा ।।

### उत्तरकाण्डम्!(षष्ठः सर्गः)

### रावणकुम्भकर्णविभीषणानां तपस्या।

ततः रामचन्द्रः मुनिम् अगस्त्यम् अब्रवीत् ब्रह्मन्! ते महाबलाः भ्रातरः तदा वने कथं कीदृशं च तपः समाचरन् कृपया तन्मे ब्रूहि। महामुनिः अगस्त्यः तदा सुप्रीतमानसं रामम् अब्रवीत् हे राम! तदा ते भ्रातरः धर्मविधी समाविशन्। कुम्भकर्णः तु नित्यं धर्मपथे स्थितः अवर्तत। सः तु ग्रीष्मकाले पञ्चाग्नीन् परितः स्थितः भवति स्म शीतकाले च जलमध्ये स्थितः भवति स्म। इत्येवं तस्य दशानां वर्षसहस्राणि व्यतीतानि अभवन्। नित्यं धर्मपरः धर्मात्मा विभीषणः पञ्चवर्षसहस्राणि एकेन पदेन स्थितः आसीत्। तस्मिन् समाप्ते नियमे स्वर्गे अप्सरसः नृत्यम् अकुर्वन्, देवाः पुष्पवर्षम् अपातयन्। पुनः सः विभीषणः पञ्चवर्षसहस्राणि सूर्यस्य आराधनम् अकरोत्। दशग्रीवः तु निराहारः सन् दशवर्षसहस्राणि तपः समाचरत्। पूर्णे वर्षसहस्रे सः तस्य एकं शिरः छित्त्वा अग्नौ अजुहोत्। एवमेव वर्षनवसहस्रेषु दशग्रीवस्य नव शिरांसि हुताशनं प्रविष्टानि अभवन्। ततः वर्षसहस्रे दशमे दशमं शिरः छेत्तुकामे दशग्रीवे तत्र पितामहः सम्प्राप्तः अभवत्। प्रीतः पितामहः देवैः सार्द्धं तत्र उपस्थाय दशग्रीवम् अब्रवीत् हे धर्मज्ञ! तव यः अभिकाङ्क्षितः वरः अस्ति तं शीघ्रं वरय। तव परिश्रमः वृथा न भविष्यति, अद्य अहं तव इच्छां पूरयामि। ततः प्रहृष्टः दशग्रीवः शिरसा प्रणम्य पितामहम् अब्रवीत् हे भगवन्! प्राणिनां नित्यं मरणाद् भयं भवति। मृत्युसमः शत्रुः नास्ति,अतः अहं अमरत्वं वृणे। दशग्रीवेण एवमुक्तः सः ब्रह्मदेवः अब्रवीत् हे सौम्य! अमरत्वं सर्वेषां नास्ति, त्वं अन्यं वरं वृणीष्व! ततः कृताञ्जलिः दशग्रीवः अब्रवीत् भगवन्! सुपर्णनागयक्षाणां दैत्यदानवराक्षसानां देवानाञ्च अवध्यः भवितुम् इच्छामि। अन्येषु प्राणिषु मम चिन्ता नास्ति। मानुषादयः प्राणिनः तु तृणभूताः इत्यहं मन्ये। दशग्रीवेण एवमुक्तः ब्रह्मदेवः हे राक्षसपुङ्गव! तथैव भविष्यति इत्यब्रवीत्। ततः ब्रह्मदेवः पुनः अब्रवीत् हे सौम्य! पूर्वम् अग्नौ त्वया यानि शिरांसि हुतानि तानि पुनः तथैव तव भविष्यन्ति। अपिच मनसा ईप्सितं सर्वमपि त्वम् इच्छामात्रेण प्राप्स्यसि। ततः पितामहः विभीषणम् अब्रवीत् हे वत्स! तव तपसा अहं परितुष्टः अस्मि। वरं वरय। प्राञ्जलिः धर्मात्मा विभीषणः तदा अब्रवीत् भगवन्! प्रीतेन यदि मह्यं वरः दातव्यः तर्हि परमापद्गते अपि मम धर्मे मतिः भवेत् इत्येवम् अहं वरं वृणे।





हिमसंस्कृतवार्ता, प्रदीपः
pradipnath997@gmail.com

प्रीतः प्रजापतिः पुनः विभीषणम् अब्रवीत् वत्स! यथा त्वं धर्मनिष्ठः तथैव तव भविष्यति। राक्षसयोनौ त्वं जन्म लब्ध्वा अपि अधर्मे तव बुद्धिः नास्ति, अतः अहं तुभ्यम् अमरत्वं ददामि। विभीषणम् एवमुक्त्वा कुम्भकर्णाय वरं दातुम् अवस्थितं ब्रह्मदेवं प्राञ्जलयः देवाः सर्वे अब्रुवन् हे देव! कुम्भकर्णाय तावद् वरः त्वया न दातव्यः। एषः दुर्मतिः लोकान् त्रासयति। हे ब्रह्मन्! नन्दनवने सप्त अप्सरसः, महेन्द्रस्य दश अनुचराः तथा ऋषयः मानुषाः अपि अनेन भक्षिताः।अलब्धवरेण अनेन राक्षसेन यत् कृतं, यदि सः लब्धवरः स्यात् तर्हि सः भुवनत्रयं भक्षयेत्। वरव्याजेन तस्मै मोहः दीयतां येन लोकानां कल्याणं तस्य च सम्मतिः भवेत्। देवैः एवमुक्तः ब्रह्मदेवः देवीं सरस्वतीम् अचिन्तयत्। ततः देवी सरस्वती तत्रागत्य प्राञ्जलिरब्रवीत् हे देव! अहं किं करवाणि? प्रजापतिः तदा तां सरस्वतीं वाक्यम् अब्रवीत् हे वाणि! त्वं देवानाम् अनुकूला भूत्वा अस्य राक्षसस्य मुखात् निःसृता भव। तथैव भवतु इत्युक्त्वा देवी सरस्वती कुम्भकर्णस्य मुखे प्रविष्टा अभवत्। ततः ब्रह्मदेवः तं कुम्भकर्णम् अब्रवीत् हे महाबाहो! त्वमपि ईप्सितं वरं वृणीष्व! ब्रह्मदेवस्य तद् वाक्यं श्रुत्वा कुम्भकर्णः अब्रवीत् हे देव! अहम् अनेकानि वर्षाणि स्वप्तुम् इच्छामि। तथा अस्तु इत्युक्त्वा ब्रह्मदेवः सुरैः सह ब्रह्मलोकम् अगच्छत्। देवी सरस्वती अपि तं निशाचरं त्यक्त्वा अगच्छत्। सरस्वत्या विमुक्तः सः दुष्टात्मा कुम्भकर्णः स्वां संज्ञां लब्ध्वा दुःखितः अचिन्तयत् अद्य किमिदं वाक्यं मम वचनात् च्युतम् अभूत्। मन्ये तदागतैः देवैरहं व्यमोहितः अभवम्। एवं लब्धवराः ते सर्वे भ्रातरः श्लेष्मातकवनं गत्वा सुखेन न्यवसन्। -प्रदीपः!

## धारावाहिको गीताप्रश्नोत्तरी



असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

धृतराष्ट्रः - उभयोः सेनयोः शूरवीरान् गुरुमुद्दिश्य प्रदर्श्य, ततः दुर्योधनः किं कृतवान् सञ्जय ? सञ्जयः - दुर्योधनः मनसि एव अचिन्तयत् यत् 'पाण्डवसेनायाः अपेक्षया अस्मत्सेना किञ्चिद् दुर्बला इव भाति । यतोहि उभयपक्षपातिना भीष्मेण अभिरक्षिता अस्माकं सेना पाण्डवसेनां विजेतुम् अपर्याप्ता, असमर्था चैवास्ति । परन्तु भीमेन अभिरक्षिता सा पाण्डवसेना अस्माकं सेनां विजेतुं पर्याप्ता, समर्था च दृश्यते' इति । धृतराष्ट्रः - एवं विचारणायाः अनन्तरं दुर्योधनेन किं कृतं सञ्जय ? सञ्जयः - राजन् ! भीष्मः, द्रोणश्च एतौ उभयपक्षपातिनौ स्तः इति दुर्योधनः पूर्वमेव जानाति स्म । अतः सः तौ प्रसादीकर्तुं, वञ्चनया युद्धे प्रेरयितुञ्च स्वकीयान् शूरविरान् उद्दिश्य एवम् उद्घोषयन् अस्ति - 'भवन्तः सर्वेषु अयनेषु दृढतया स्थिताः सन्तः पितामहं भीष्मं सर्वतोभावेन रक्षन्तु' इति । धृतराष्ट्रः - तदनन्तरं तत्र किं जातं सञ्जय ? सञ्जयः - निजरक्षावार्तां श्रुत्वा पितामहः भीष्मः दुर्योधनस्य प्रह्लादनार्थं सहसा सिंहवद् गर्जनं कृत्वा स्वशङ्खम् उच्चैः निनादितवान् । धृतराष्ट्रः - भीष्मस्य शङ्खनादस्य अनन्तरं किम् अभूत् ? सञ्जयः - पितामहः भीष्मस्तु दुर्योधनस्य प्रसादनार्थमेव शङ्खं निनादितवान् आसीत्, परन्तु कौरवसैनिकाः तु तद्युद्धारम्भस्य घोषणां हि अमन्यन्त । अतः भीष्मस्य शङ्खध्वनिं श्रुत्वा सर्वैः स्वकीयाः शङ्खाः, भैर्यः, पणवाः, मृदङ्गाः च इत्येतानि वाद्यानि निनादितानि अभवन् । तेन निनादकार्येण सः मिश्रितध्वनिः तुमुलः, भयङ्करश्च सञ्जातोऽस्ति । धृतराष्ट्रः - यदा कौरवपक्षीयैः वाद्यानि निनादितानि, तदा किमभूत् सञ्जय ? सञ्जयः - यद्यपि एकपक्षीयस्य वाद्येषु निनादितेषु अपरपक्षीयस्य अपि वाद्यानि नादनोचितानि एव आसन्, तथापि तस्यै पाण्डवसेनायै न केनापि आज्ञा दत्ता । एवञ्चेदपि श्वैतैः हयैः युक्ते महति रथे स्थितवन्तौ भगवान् श्रीकृष्णः पाञ्चजन्यनामकं शङ्खम्, एवञ्च अर्जुनः देवदत्तनामकं शङ्खम् उच्चैः निनादितवन्तौ । तदनन्तरं भीमः पौण्ड्रनामकं, युधिष्ठिरः अनन्तविजयनामकं, नकुलः सुघोषनामकं, सहदेवः मणिपुष्पकनामकं च स्वीयं स्वीयं शङ्खं ते निनादितवन्तः इति ।(अनुवर्तिष्यते

## शब्दानां ज्ञाने धर्मः उत प्रयोगे?

व्याकरणशास्त्रेण धर्मार्थः नियमः क्रियते यत् साधुशब्दा एव प्रयोक्तव्या इति। तर्हि एतेषां शब्दानां ज्ञानेन धर्मः भवति उत प्रयोगेण? उक्तं च – 'एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः लोके वेदे च कामधुग्भवति' इति। तत्र शब्दज्ञानात् वा तस्य प्रयोगात् वा अथवा उभाभ्यामपि अभ्युदयफलं प्राप्यते इत्यत्र सन्देहः। ज्ञाने धर्मः इति चेत्तथाऽधर्मः। साधुशब्दज्ञानेन सह असाधुशब्दानामपि ज्ञानं भवति। साधुशब्देभ्यः असाधुशब्दाः भूयांसः। यथा गौः इति एकः साधुशब्दः तथापि तस्य गावी, गोणी, गोता, गोपोतलिका इत्यादयः नैके अपभ्रंशाः। यदि शब्दज्ञाने धर्मः इति उच्येत तर्हि साधुशब्दज्ञानात् अपशब्दज्ञानं अधिकं तेन धर्मात् अधिका अधर्मस्य प्राप्तिरेव भवेत्। आचारे नियमः। आचारे (प्रयोगे) एव नियमः कृतः अस्ति यत् साधुशब्दा एव प्रयोज्याः इति। ऋषिर्वदति– 'तेऽसुराः हेलयो हेलयः इति कुर्वन्तः पराबभूवुः' इति। यज्ञकर्मणि असुरैः 'हेऽरयः हेऽरयः' इत्यस्य स्थाने साधुशब्दज्ञानाभावात् 'हेलयः हेलयः' इत्येवं शब्दाः प्रयुक्ताः। अतः अपशब्दप्रयोगात् ते युद्धे देवैः पराजिताः अभवन्। अतः पराभवं मा प्राप्नुम इति साधुशब्दाः प्रयोज्याः असाधुशब्दाः परिहर्तव्याः इति नियमं ऋषिः कथयन् अस्ति। एषः शब्दप्रयोगविषयः नियमः। अतः प्रयोगे धर्मः इति अभ्युपागमः क्रियते चेत्– प्रयोगे सर्वलोकस्य। प्रयोगे धर्मः इति वदामश्चेत् व्याकरणज्ञानाय कृतः प्रयत्नः निष्फलः एव भवेत्। यतः केवलं काव्यादीनाम् अध्ययनं कृत्वा ततः प्राप्ताः शब्दाः प्रयुक्ताश्चेत् धर्मप्रापणात् सर्वेषामेव अभ्युदयः निश्चितः। प्रयत्नः नित्यं फलवान् भवेत् तथा तु नात्र दृश्यते?एवं तर्हि वदामः यत् ये व्याकरणे कृतप्रयत्नाः त एव साधीयः शब्दान् प्रयोक्ष्यन्ते तेन त एव धर्मप्रापकाः भविष्यन्ति, तेषामेवाभ्युदयः निश्चितः। तथापि व्यवहारे तु विपरीतमेव दृश्यते यत् व्याकरणे कृतप्रयत्नाः बहवः साधुशब्दप्रयोगे अकुशलाः अकृतप्रयत्नाश्च कुशलाः। अतः अभ्युदयफलस्य विपरीतता अपि भवेत्। अकृतपरिश्रमः अभ्युदयं प्राप्नुयात् कृतप्रयत्नश्च तस्मात् वञ्चितः तिष्ठेत्। अतः व्याकरणाध्ययनाय न कोऽपि प्रयत्नं कुर्यात्।एवं केवलं साधुशब्दज्ञाने धर्मः अथवा केवलं प्रयोगे धर्मः इति उभयोः पक्षयोः दोषाः दृश्यन्ते। तान् परिहर्तुं वयं वदामः-- शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन। व्याकरणशास्त्रस्य अध्ययनं कृत्वा साधुशब्दानां ज्ञानं भवति तज्ज्ञानपूर्वकं शब्दान् प्रयुञ्ज्महे चेत् धर्मः भवति तेन च अभ्युदयः। अतः ज्ञानसहितप्रयोगे धर्मः इति युक्तिसङ्गतम्। एतत् वेदे अपि दृश्यते यथा 'योऽग्निष्टोमेन यजते य उ चैनमेवं वेद', 'योऽग्निं नाचिकेतं चिनुते य उ चैनमेवं वेद।' एतस्याशयः यत् वैदिकानुष्ठानेषु ज्ञानपूर्वकं कर्माणि कुर्वन् मनुष्यः स्वर्गादिफलं प्राप्नोति। अत्रापि व्याकरणे यः शास्त्रमधीत्य ज्ञानपूर्वकं शब्दान् प्रयुङ्क्ते सः अभ्युदयफलभाक् भवति।इदानीं वैयाकरणः वदति–तथापि ज्ञानपूर्वकप्रयोगे धर्मः इत्यत्र गौरवदोषः अस्तीति मन्यामहे, यतः एकेन धर्मे साध्ये सति उभयस्य आवश्यकता प्रतिपादिता। 'शब्दज्ञाने धर्मः' एवमेव अभ्युपगमः अस्माकम्। आक्षेपकः —केवलं ज्ञाने धर्मः इत्यत्र अपशब्दज्ञानात् अधर्मप्राप्तिरूपः दोषः तु दर्शितः एव ननु?वैयाकरणः — वयं शब्दप्रमाणकाः स्मः। वेदादिः आप्तोपदेशः शब्दः। वेदेन उक्तं यत् शब्दज्ञाने धर्मः इति। अपशब्दज्ञाने अधर्मः इति तु नोक्तं क्वचिदपि। यत् न अनुशिष्टं प्रतिषिद्धं वा तस्य ज्ञानेन अधर्मः कथं भवितुं शक्येत? अतः अपशब्दज्ञाने न दोषः नैव चाधर्मः यथा हिक्काहसितकण्डूयनादिभिः सहजक्रियाभिः न दोषः अभ्युदयः वा। अथवा शब्दानां ज्ञाने अपशब्दज्ञानं साधनभूतम् इति मन्यामहे। कथम्? यथा अङ्गारान् आनय इत्युक्ते कथनं विनापि मनुष्यः पात्रे स्थापयित्वा तान् आनयति हस्ते गृहीत्वा तेषाम् आनयनस्य अशक्यत्वात् , तथैव शब्दानां ज्ञानाय अपशब्दज्ञानमपि पात्रवत् साह्यकारि भवति। अथवा कूपखानकवत् तद्भवति। यथा कूपं खनन् मनुष्यः पङ्केनावलिप्तः भवति पुनश्च जलोद्गमे तेन जलेन शुद्धः भवति तथैव अपशब्दज्ञानात् प्राप्तः अधर्मः पश्चाज्ञ्जनितस्य साधुशब्दस्य ज्ञानेन परिमार्जितः भवति। 'आचारे नियमः' इति यदुक्तं तत् वेदकर्मस्वेव साधु। यर्वन् तर्वन् नामकाः ऋषयः बभूवुः। तैः धर्मः प्रत्यक्षीकृतः आसीत्। तथापि व्यवहारकाले ते ' यद्वा नः तद्वा नः' (यत्किमपि अस्माकं तदस्माकं भवतु') एवं वक्तव्ये 'यर्वाणः तर्वाणः' एवम् अपशब्दप्रयोगं कुर्वन्ति स्म। यज्ञकर्मणि ते एवं अपशब्दप्रयोगान् न कुर्वन्ति स्म। तेन ते नाधर्मफलभाजः अभवन्।तथापि यज्ञकर्मणि अपशब्दानां प्रयोक्तारः असुराः तज्ञ्जन्याधर्मात् पराबभूवुः। एतेन सिद्धं यत् यज्ञकर्मणि एव शब्दप्रयोगे साधुशब्दोपयोजनस्य नियमः लौकिकव्यवहारे न।

श्री.अभिजित् तोडकरः सुभाषितशिक्षणप्रमुखः
संस्कृतभारती, पश्चिममहाराष्ट्रप्रान्तः।